# श्रीसोमनाथसंस्कृतयुनिवर्सिटी ,वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल-२०१९

| | | |
|---|---|---|
| कक्षा–आचार्यद्वितीयवर्षम्(SEM- 4) | **प्रश्नपत्रम् – ३** | गुणा: - ७० |
| विषय: - नव्यव्याकरणम् | **कोड – CC 5.4.11** | समय: - ११ त: ०२ |
| दिनाङ्क: - ०१-०४-२०१९ | सन्दर्भग्रन्थः – वैयाकरणभूषणसार: \| | |

.................................................................................................

**प्रथमान्विति:**

**प्रश्न:-१ कस्याप्येकस्य संक्षिप्तमुत्तरं लेख्यम् | (०५)**

(१) फणिभाषितभाष्याब्धे: शब्दकौस्तुभ उद्धृत: |
तत्र निर्णीत एवार्थ: संक्ष्येपेणेह कथ्यते ||

(२) यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते |
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते ||

**प्रश्न:-२ कस्याप्येकस्य सविस्तरमुत्तरं लेख्यम् | (१०)**

(१) फलव्यापारयोर्धातुराश्रये तु तिङ् स्मृता: |
फले प्रधानं व्यापारस्तिङ्गर्थस्तु विशेषणम् ||

(२) उत्सर्गोऽयं कर्मकर्तृविषयादौ विपर्ययात् |
तस्मात् यथोचितं ज्ञेयं द्योतकत्वं यथागमम् ||

द्वितीयान्विति:

**प्रश्न:-३ कस्याप्येकस्य संक्षिप्तमुत्तरं लेख्यम् | (०५)**

(१) धात्वर्थत्वं क्रियात्वं चेत् धातुत्वं च क्रियार्थता |
अन्योऽन्यसंश्रय: स्पष्टतस्मादस्तु यथाऽऽकरम् ||

(२) 'आत्मानं जानाति' इत्यत्र सकर्मकत्वं कथं प्रतिपादितं ग्रन्थकारेण इति विवृणुत |

**प्रश्न:-४ कस्याप्येकस्य सविस्तरमुत्तरं लेख्यम् | (१०)**

(१) अस्त्यादावापि धर्म्यंशे भाव्येऽस्त्येव हि भावना |
अन्यत्राऽशेषभावात्तु सा तथा न प्रकाश्यते

(२) आख्यातशब्दे भागाभ्यां साध्यसाधनरूपता |
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रम: ||

## तृतीयान्विति:

**प्रश्न:-५ कस्याप्येकस्य संक्षिप्तमुत्तरं लेख्यम् |** **(०५)**

(१) आत्मन: नित्यत्वं यद्यपि प्रसिद्धं तथापि 'अहमासम्' इत्यादि प्रयोगाणामुपपत्ति: ग्रन्थकारेण कथं प्रदर्शिता ?

(२) पुंसा नेष्टाभ्युपायत्वात् कृयास्वन्य: प्रवर्तक: |
प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम् || इति मंडनमिश्रोक्तं व्याख्यायताम् ।

**प्रश्न:-६ कस्याप्येकस्य सविस्तरमुत्तरं लेख्यम् |** **(१०)**

(१) वर्तमाने परोक्षे श्वो भाविन्यर्थे भविष्यति |
विध्यादौ प्रार्थनादौ क्रमाज्ज्ञेया लडादाय: ||

(२) ह्यो भूते प्रेरणादौ च भूतमात्रे लडादय: |
सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृत: ||

## चतुर्थान्विति:

**प्रश्न:-७ कस्याप्येकस्य संक्षिप्तमुत्तरं लेख्यम् |** **(०५)**

(१) सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा |
सुबन्तेनेति च ज्ञेय: समास: षड्विधो बुधै: ||

(२) 'पूर्वपदार्थादिप्राधान्याश्रितं समासस्य चतुर्विधत्वं रेखागवयादिवदास्थितम्' इति ग्रन्थकाराशयं स्पष्टीकुरुत |

**प्रश्न:-८ कस्याप्येकस्य सविस्तरमुत्तरं लेख्यम् |** **(१०)**

(१) अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्यन्तरकल्पना |
क्लृप्त्यागश्चास्ति तव तत् किं शक्तिं न कल्पये: || इति कारिका व्याख्येया ।

(२) पर्यवस्यच्छाब्दबोधाविदूरप्राक्षणस्थिते: |
शक्तिग्रहेऽन्तरङ्गत्व बहिरङ्गत्वचिन्तनम् || इति कारिका व्याख्येया ।

**प्रश्न:-९ केषामपि दाशानाम् एकैकवाक्यैन उत्तराणि देयानि |** **(१०)**

(१) 'निषादस्थपति' शब्दस्य कतिभि: प्रकारै: विग्रह: ग्रन्थे प्रदर्शित: ?

(२) सुपां सुपा समासस्य किमुदाहारणम् ?

(३) सुपां तिङा सह समासस्य किमुदाहारणम् ?

(४) सुपां नाम्ना सह समासस्य किमुदाहारणम्?

(५) प्राचीनवैयाकरणानुसारं समास: कति विध: ?

(६) जहत्स्वार्थावृत्ति: कतिविधा ?

(७) किं वर्तमानत्वम् ?

(८) वर्तमानत्वादि लडादिभिर्द्योत्यं वाच्यं वा ?

(९) कीदृशे भूते परोक्षे लिट् भवति ?

(१०) 'पश्य मृगो धावति' इत्यत्र 'धावति' क्रिया साध्या साधनं वा ?

(११) 'अस्' धातौ वैयाकरणै: व्यापारस्य सत्वं स्वीक्रियते न वा ?

(१२) कर्म कतिविधम् ?

(१३) कीदृशे कर्मणि कर्मवद्भावः न संभवति ?

(१४) स्वार्थव्यापारव्यधिकरणफलवाचकत्वं कस्य लक्षणम् ?

(१५) कौण्डभट्टस्य पिता क: ?